घातकर्त्तृत्वमुक्तम् का॰टी॰ख॰ "खादकोघातकस्तथेति" चतुर्थचरणे पाठः। तेन अष्टानां कर्त्तृत्वमुक्तम्। स च प्रकारान्तरेण त्रिविधः "त्रिधैव ज्ञायते कर्त्ता विशेषेण क्रियां प्रति। योग्यत्वप्रतिषिद्धत्वविशेषणपदान्वयैः" भट्टका॰। अस्यार्थः क्रियां प्रति प्रकारत्रयेण कर्त्ता विज्ञायते तस्य विवरणम् "स्वाध्यायोऽध्येतव्यः" इत्यत्र योग्यत्वेन लब्धविद्यस्त्रैवर्णिकः, १। "अहरहर्दद्यात् दीक्षितो न ददाति इत्यत्र प्रतिषिद्धत्वेन दीक्षितेतरःपरः २। "स्वर्गकामो यजेत" इत्यत्र विशेषणपदान्वयेन स्वर्गकामः कर्त्ता ज्ञायते३,। स च प्रकारान्तरेण त्रिविधः सात्त्विकादिभेदात् यथाह गीता "मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते" "रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः। हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः" "अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः। विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते"। कर्त्तृपदञ्च क्रियाश्रये कृत्याश्रये वा मतभेदेन रूढं न तु यौगिकमित्येतत् शब्दचि॰ भट्टमतदर्शनप्रस्तावे दर्शितं यथा

"अथ क्रियाजन्यत्वाविशेषेऽपि यत्नजन्यत्वाजन्यत्वाभ्यां घटाङ्कुरयोः कृताकृतत्वव्यवहारात्तृजन्तकृधातुव्युत्पन्नकर्तृपदस्य कृत्याश्रयत्वबोधकत्वाच्च कृञोयत्नार्थत्वं, क्रियामात्रार्थत्वे कृञः, क्रियाश्रयः कर्तृपदार्थः स्यात्। तथा च कारकमात्रेऽतिप्रसङ्गः एवञ्च कृञो यत्नार्थत्वेन चाख्यातविवरणात् तस्यापि यत्नोऽर्थः। तदुच्यते। "कृताकृतविभागेन कर्तृरूपव्यवस्थया। यत्नएव कृतिः पूर्वा परस्मिन् सैव भावना" सैवाख्यातार्थोभावनेति चेत्। वीजेनाङ्कुरः कृतः स्वर्गादिना सुखं कृतं वीजमङ्कुरं करोतीति यत्नं विनापि व्यवहारात्" "कर्तृपदञ्च न यौगिकं तथा हि कृञोयत्नार्थत्वे तिङः कृत्यर्थत्वे वा धातुप्रत्ययार्थयोः कृतिकृञोर्वा परस्परमनन्वयः कृतौ कृतिजन्यत्वस्य तद्विषयत्वस्य वाऽभावात् कृतिविशिष्टस्य कृतिनिराकाङ्क्षत्वादिति। एवं कृञः क्रियार्थत्वे तृचश्च क्रियाश्रयवाचकत्वे तयोः परस्परमन्वय एवेति उभयदर्शने कर्तृपदं कर्म्मादिपदवद्रूढमेव। रूढिश्च कृत्याश्रये क्रियाश्रये चेत्यन्यदेतत् तथा च कृताकृतविभागेन च कर्तृरूपव्यवस्थया च न कृञो यत्नार्थत्वमिति" किञ्चाख्यातस्य करोतेश्च न यत्नार्थत्वम् पाकाय यतते पाकं करोतीत्यादौ यत्नद्वयस्य यत्नविषयकयत्नस्य वाऽप्रतीतेः प्रकृतिप्रत्ययार्थयोश्च साम्येनान्वयानुपपत्तेः पौनरुक्त्यात् एकत्रैव विध्यनुवाददोषाच्च" इत्यादिकम् भट्टमतम्। स्वमते तु कृञः यत्नार्थत्वमिति भेदः तच्च कृधातुशब्दे दर्शयिष्यते। शब्द॰प्र॰कर्तृपदं यौगिकमिति व्यवस्थाप्य तल्लक्षणमुक्तं यथा

"तिङा विकरणाक्तस्य धातोरर्थस्तु यादृशः। स्वार्थे यादृशि बोध्यस्तत्कर्तृत्वं तदिहोच्यते। सविकरणेन यद्धातुनोपस्थाप्योयादृशार्थस्तदुत्तरतिङा स्वोपस्थाप्ययादृशार्थोऽनुभावयितुं शक्यस्तद्धातूपस्थाप्यस्य तस्य तदेव कर्तृत्वं कारकमित्यर्थः। कर्म्मत्वादौ धातुनोपस्थाप्योऽर्थस्तिङानुभाव्योऽपि न विकरणाक्तेनेति न तत्र प्रसङ्गः। पचति जानातीत्यादौ स्वोपस्थाप्यकृत्याश्रयत्वादौ धातूपस्थाप्यस्य पाकबुद्ध्यादेरन्वयः पचाद्युत्तरतिङा बोध्यत इति पाकस्य यत्नवत्त्वं, ज्ञानस्याश्रयत्वमेवं नश्यतीत्यत्र नाशस्य प्रतियोगित्वं प्रतिविम्बत इत्यत्र भ्रमात्मनः प्रतिविम्बस्य प्रकारत्वमेव कर्तृत्वम्। कर्तृशब्दस्तु अवयवशक्तिलभ्ये कृत्याश्रये यौगिकएव न तु शक्यार्थकः प्रकारान्तरालभ्यस्यैव शक्यत्वात् निरूढलक्षणया शक्त्यैव चाश्रयत्वस्य तृचा प्रत्यायनात्। घटस्य कर्त्तेत्यादौ चानुकूलत्वं षष्ठ्यर्थः फलस्य प्रायशः कृतिविषयत्वात् घटाद्युपभोगानुकूलकृतिश्च न घटाद्यनुकूला प्रमाणाभावात् अतोन घटादिभोक्तुस्तत्कर्तृत्वप्रसङ्गः। क्रियाश्रये कर्तृशब्दोरूढस्तेन रथादेर्गत्यादिकर्तृत्वमपि मुख्यमेवेति तु न युक्तम्। क्रिया हि नात्र स्पन्दस्तेनस्य पाककर्तृत्वानुपपत्तेः प्रत्युत तण्डुलादेरेव तथात्वापत्तेः नापि धात्वर्थमात्रम् अतएव,नापि स्पन्दनानुकूलव्यापारः चलनानुकूलव्यापारवतः कारकमात्रस्य चलनकर्तृत्वापत्तेः। अपि जुहोतीत्यादावप्यदादेरुत्तरं लुप्तस्यैव विकरणस्य प्रतिसन्धाने भोजनकर्तृत्वादेरववगम इति। तदप्रतिसन्धानेऽपीति मतेनाह। यगन्तभिन्नधात्वर्थवत्तया योऽनुभाव्यते। लटा स्वार्थः स धात्वर्थः कर्तृता वा निगद्यते। यगन्तभिन्नधातूपस्थाप्ययादृशार्थप्रकारयद्धर्म्मिकान्वयबोधं प्रति लटः सामर्थ्यं स एवार्थो धातूपस्थाप्यतदर्थस्य कर्तृत्वम् पच्यत इत्यादौ धातोरर्थवत्तया स्वार्थकर्म्मत्वं लटानुभाव्यमपि न यगन्तभिन्नस्य, पच्यते तण्डुल इत्यादौ तु तादृशस्य धातोरर्थवत्तया तिङैव स्वार्थः कर्म्मत्वमनुभाव्यते न तद्विशेषेण लटेति तदग्रदोषः। अपादानत्वादिभेदेन षड्विधत्वमिवोक्तानुक्तत्वभेदेन कारकस्य द्वैविध्यमप्यस्तीति तदनुक्ता न्यूनत्वमत आह। धात्वर्थस्य